CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

SDPB
Coll. No. 490

Title Tattva bodhinī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 470 Subject : Grammar

Title : Tattvabodhini

Author : Jñānendra Sarasvati Scribe : —

Date of the work : Date of the Ms. : —

Place of the work : Place of the Ms. : —

Size : 9.3" by 5.5" Extent : 23 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Incomplete.

कौमुद्याद्वितीयवृत्तिव्याख्यापत्राणिनव९

ॐश्रीपरब्रह्म श्रीगणेश श्रीसांबशिव श्रीमहाविष्णुभ्यः सपरिवारेभ्यो नमो नमः। अथ कर्मकर्तृप्रक्रिया। कर्मणास्त्विति।
सौकर्यातिशयं द्योतयितुमित्यनुषंगः। प्रायेणेति। ये भिदिच्छिदिप्रभृतय एककर्मकास्ते अकर्मकाः। ये
तु द्विकर्मकास्ते सकर्मका इति भावः। अकर्मकत्वस्य फलमाह। भावे कर्तरि चेति। भावे चाकर्मकेभ्य
इत्युक्तत्वादिति भावः। द्विकर्मकेषु कर्मणः कर्तृत्वविवक्षायामुदाहरणम्। मथ्नाति सागरोऽमृतम्।
सकर्मकाणां प्रतिषेधो वक्तव्य इत्यनेन कर्मवद्भावाभावः। अधिकरणत्वाविवक्षायां व्रजो गौणकर्मेति
णाद्धि व्रजो गां स्वयमेवेति भवति। यदा तु व्रजस्य न कर्मत्वं तदा मुख्यकर्मणोऽपि कर्तृत्वविवक्षायां
भवति। रुध्यते व्रजे गौः स्वयमेवेति। तथा गोरपादानाविवक्षायां गौर्दुह्यते पयः स्वयमेवेत्यादि। दुहि
पच्योर्बहुलं सकर्मकयोरिति कर्मवद्भावः। द्विलकारकादिति। व्यत्ययो बहुलम् छिश्याशिषि ङिति
संहितायाः पाठेऽनुस्वारपरसवर्णेन जाते लकारे तस्योपरि लद्वयमित्यर्थस्तेन लकारवाच्यः कर्ता
कर्मवदित्यर्थलाभाद्द्वितीयेत्यभिमतसिद्धिः। कृत्यक्तखलर्था इति। कृत्यक्तखलर्था इत्यत्र
कृद्ग्रहणं त्यक्तुमुचितम्। सिनोतेर्ग्रासकर्मकर्तृकस्येति वार्तिकेन सिनो ग्रासः स्वयमेवेति व
दयति। कर्मत्वकर्तृत्वेति। कर्मत्वकर्तृत्वावस्थयोर्भेदस्तद्भेदोपाधिकं अवस्थाभेदसमानाधिकरणे

क्रियाभेदमाश्रित्येत्यर्थः। एवमवस्थाभेदेन क्रियाभेदात्कर्मस्थक्रियातुल्यक्रियावत्त्वं कर्तुरस्तीति
भावः। करणाधिकरणाभ्यामिति। तुल्यक्रियः कर्तेत्येतावत्युच्यमाने असिना छिनत्ति स्थाल्यां
पचतीत्यादौ करणाधिकरणयोर्यो व्यापारः स एवेदानीमसिश्छिनत्ति स्थाली पचतीत्यादौ कर्तु
स्य इत्यतिप्रसंगः स्यात्तन्माभूदित्यर्थः। किंचेति। अधिगच्छतीत्यादिश्लोकस्योत्तरार्द्धं यत्तत्पा
वशात्तस्मिन्मोक्षसुखवेसदा। ननु फलव्यापारयोर्धात्वर्थः स एव क्रियाशब्दवाच्यस्तत्र व्यापाराश्रयः
कर्ता। फलाश्रयस्तु कर्म। एवं च पचिभिदिप्रभृतीनां गम्यादीनां च सकर्मकत्वे फलस्य कर्मनिष्ठत्वे
च तुल्ये कर्तृस्थभावका गम्यादय इति कथं ज्ञातव्या इत्यत आह। यत्र च कर्मणीति। ग्रामे स्थिति।
आरूढानारूढहस्तिषु अधिगतानधिगतशास्त्रार्थेष्वित्यादावपि वैलक्षण्यं नोपलभ्यत इति
बोध्यम्। कारिष्यत इति। स्यसिच्सीयुडिति वैकल्पिकश्चिण्वदिट्। पक्षे ऋद्धनोः स्ये इतीट्। करिष्यते।
एवं लृङि लुङि। अचः कर्मकर्तरि। अजंतात्परस्य च्लेश्चिण् एवास्यात्कर्मकर्तरीति च्लेश्चिणादेशपक्षे।
अकारि। पक्षे वैकल्पिके चिण्वदिटि। अकारिष्ट पक्षे अकृत। सीयुटि चिण्वदिटि। कारिषीष्ट। पक्षे
कृषीष्ट। तासि तु। कारिता। कर्ता। लिटि क्रियते घटः स्वयमेवेत्यादि। नैतत्सिध्येदिति। कर्मवत्कर्मणेति

कर्मवत्त्वं न सिध्येदित्यर्थः। करोतेर्यत्नार्थत्वे तु यतते इतिवदकर्मकतापि न स्यादिति। एतेनेति। ज्ञानस्य कर्तृ
स्थत्वव्युत्पादनेनेत्यर्थः। घटोयं इति ज्ञानानंतरं घटमहं जानामीति ज्ञानं अनुव्यवसायः। अ
नुव्यवस्यतीत्यनुव्यवस्यमानः। यगभावादिति। सति तु यकि अनुव्यवसीयमान इति स्यादिति भावः। ओ
लोपे इति। ओतः श्यनि। लोपः स्यादित्यनेन। ननु कर्मवत्त्वाभावे कथमिह शानजित्यत आह। ताच्छीला
दाविति। नत्विति। शानच् न भवतीत्यर्थः। देवदत्तयज्ञदत्तावन्योन्यं स्पृशत इत्यत्र तयोरेव कर्मत्वं कर्तृ
त्वेप्यास्तीति कर्मस्थक्रियायाः कर्तृस्थत्वात्कर्मवद्भावप्राप्तिमाशंक्याह। सकर्मकाणामिति। अन्योन्य
मिति। यद्यपीह संयोगानुकूलक्रिया कर्मत्वकर्तृत्वोपयोगिनी उभयनिष्ठा तथापि व्यक्तिभेदोस्त्येव।
अत एवान्यनिष्ठां क्रियां प्रत्यन्यस्य कर्मत्वं अन्यथा उभयोरपि कर्तृत्वमेव स्यान्न तु कर्मत्वं। इमौ गां
स्पृशत इत्यत्र यथा। एवं स्थिते कर्मत्वोपयोगिनी या क्रिया तया तुल्यक्रियस्य तदीयकर्तुर्विधीयमा
नः कर्मवद्भाव इह न प्राप्नोत्येव। तत्किं वार्त्तिकारंभेणेत्याशंक्योदाहरणांतरमाह। अजेति। ग्रामं नय
नीति। इह प्रतिषेधाभावे यक्स्यात् क्रियाफलस्याकर्तृगामित्वे चात्मनेपदं स्यादिति भावः। नन्विहापि
कर्मणि क्रियाकृतो विशेषो नोपलभ्यत इति कर्मस्थक्रियत्वं दुरुपपादमिति चेत्तत्राहुः। क्रियाकृत
विशेषोपलंभानुपलंभयोरुद्देश्यतापि नियामिका। यत्र कर्मस्थांशस्योद्देश्यता सा कर्मस्थक्रिया।

यत्र तु व्यापारांशस्य सा कर्तृस्थेति। तथाहि। दर्शनारोहणाभ्यां विषये न्यग्भूतेपि विशेषानुपलंभात्कर्तृ
स्थतोद्देश्यतानुरोधाच्च। अहं पश्येयमित्युद्देशेन त्वयं विषयो भवत्विति। एवमहं ह्युपरि गच्छेय
मित्युद्देशेन तु हस्तिनो न्यग्भावो भवत्विति। ऊर्ध्वदेशसंयोगानुकूलव्यापारविशेषेणोपरिगमनं त
देव रुहेरर्थो न तु न्यग्भावमात्रम्। ज्ञानविशेषविषयत्वापत्त्युपसर्जनविषयत्वापादनवच्च नो
दृशिः। पचिभिद्योस्त्विति। द्विधाभवनरूपो विशेषः कर्मणि दृष्टस्तदुद्देशेनैव कारकव्यापार
इति कर्मस्थक्रियत्वात्पच्यते ओदनः। भिद्यते काष्ठमित्यत्र कर्मवद्भावो भवति। एवमजा ग्रामं
नयतीत्यत्रापि कर्मस्थांशस्य संयोगस्योद्देश्यता न तु व्यापारांशस्य कर्मवद्भावे प्राप्ते प्रतिषेधोप्या
वश्यक इति दिक्। दुहिपच्योरिति। द्विकर्मकत्वादनयोरेकस्य कर्मणः कर्तृत्वविवक्षायामपि सकर्मक
त्वान्निषेधे प्राप्ते ऽयमारंभः। गौः पयो दुग्धे इति। अत्र कर्मवद्भावेनात्मनेपदं नित्यम्। गौणे कर्मणि
दुह्यादेरित्युक्तत्वान्मुख्यस्य कर्मणः कर्तृत्वविवक्षायां गां दुग्धे इति नोदाहृतमित्याहुः। उदुंबरः फल
मिति। कालः उदुंबरं फलं पच्यतीति स्थिते गौणकर्मण उदुंबरस्य कर्तृत्वविवक्षायामिह कर्मवद्भावः।
सृजियुज्योः। श्यनि सति नित्वात्प्रकृतेराद्युदात्तत्वं भवति। यकि तु सार्वधातुकानुदात्तत्वे यक एवोदा
त्तत्वं स्यात्। अवाकीर्ष्टेति। लिङ्सिचोरिति वेट्। आद्रियत इति। तुदादित्वात् शः। रिङ् शयग्लिङ्क्षु इति

शिङिप्रयङ्। आद्दनेशेति। उरयेति किम्। ह्रस्वादंगादिति सिचो लोपः। चिकीर्षते कट इति। कट उत्प
द्यते इत्यर्थः। अनमेति। नपरस्तापस इत्यनुवर्त्यते। न दुह। ननु दोग्धिपर्यायत्वेन स्नौतेरपि द्विकर्मक
त्वाद्गौणकर्मणः कर्मणः कर्तृविवक्षायामपि पयोरूपकर्मणो विद्यमानत्वात् सकर्मकाणां
प्रतिषेध इति निषेधेन यक्चिणोः प्राप्तिरेव नास्तीति चेत्। अत्राहुः। वत्सादियोगेन क्षीरप्रस्र
वणानुकूलोत्कंठा स्नुधातोरर्थः। सा च गोनिष्ठा। स्नुप्रस्रवणे इत्यत्रापि करणे ल्युट्। प्रस्नूयते
अनेनेति प्रस्रवणं। सा च उत्कंठा वत्सो गां प्रस्नौतीति। उत्कंठयति। अंतर्भावितण्यर्थोऽत्र स्नौतिः॥
गोः कर्तृकत्वविवक्षायां प्रस्नुते गौरिति। नमते दंडः। इति इह नमितानमितयोर्विशेषादर्शनादुद्दे
शानुरोधात् कर्मस्थक्रियत्वमस्ति। कर्मस्थांशस्य नमनस्य ह्युद्देश्यता न तु तदनुकूलव्यापारस्ये
स्येति कर्मवद्भावस्य प्राप्तिरस्तीति भावः। अचीकरतेति। चिणि प्रतिषिद्धे णिश्रीति चङ्। उत्पुच्छ
यते गौरिति। पुच्छभांडचीवराण्णिङ्। स यदांतर्भावितण्यर्थस्तदा उत्पुच्छयते गां। पुनः सौकर्याति
शयेन कर्तृत्वविवक्षायामुत्पुच्छयते गौः स्वयमेव। आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति॥
विकुर्वते सैंधवा इति। वल्गंतो। भौवादिकः। तान् यदान्यो वल्गयति तदा तेषां कर्मत्वं। पुनः सौ
कर्यातिशयाय कर्तृत्वविवक्षायां विकुर्वते सैंधवाः स्वयमेव सुष्ठु वल्गंतीत्यर्थः। सैंधवा अश्वाः॥ ३८२

कुषिरंजोः। न दुहस्नुनमामित्यतो नेत्यनुवर्तते तदाह। न यगिति। किंतु श्यन्निति। तस्मिन्नेव विषये इति
भावः। यकः प्रतिषेधं तत्त्वाविधीयमानः श्यन् तदीयस्थाने एव भवति। अतो यायष्टे। यगविषये तु नास्येति
श्यनः संनियोगशिष्टं परस्मैपदं श्यन्नभावेन भवतीत्यात्मनेपदमेवोदाहरति। कोषिषीष्टेति। कोषिषते।
कुकुषे। अकोषि। अकोषिषातां। रंक्ष्यते। ररंजे। अरंजि। अरंक्ष्यत इत्याद्यपि ज्ञेयं। श्यनप्रहे तु कुष्णातीत्यत्र
नित्यं तुम्। यक्पक्षे तु आ च्छीनद्योरिति विकल्पः। स्वरे विशेषोऽप्यस्त्येव। इह प्रकरणे भिद्यते काष्ठं स्वयमेवेति
इत्यादौ प्रयुज्यते। तत्र स्वयं शब्दः करणार्थकोऽज्ञेयः। आत्मना करणेनेति। कर्तृत्वे तु कर्मणि लट् स्यात्।
स्पष्टं चेदं कैयटादौ। इति कर्मकर्तृप्रक्रिया॥ अथ लकारार्थप्रक्रिया। अभिज्ञा। भूते इत्यधिक्रियते।
अनद्यतने लङित्यतो। अनद्यतन इति वर्तते। अभिज्ञा स्मृतिः सा उच्यते बोध्यतेऽनेनेति विग्रहस्तदाह।
स्मृतिबोधिनीत्यादि। वत्स्याम इति। अवसामेत्यर्थः। पश्य मृगो धावतीत्यत्र वाक्यार्थरूपमृगकर्तृकधावन
मिव स्मरसीत्यत्र गोकुलाधिकरणकास्मत्कर्तृकभूतानद्यतनवासो वाक्यार्थः कर्म। लृट् छेति स्मरणक्रिया
यां विशेषणं। तथा च पूर्वोक्तनिवासकर्मकं सच्छसंबोधकं स्मरणमिति फलितोऽर्थः। वासो लक्षणमिति।
प्रसिद्धत्वात् ज्ञापकमित्यर्थः। चारणं लस्यामिति। सह सा बुद्धा। नारोगाद्याध्यम्। पद्धेलङिति। वने अवसाम।
गा अचारयाम। नाहमित्यादि। कलिंगा नाम निषिद्धो देशः। अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च। यातीर्थ

यत्रां विनागत्वा पुनः संस्कारमर्हतीति स्मरणात् तस्मिन् देशे त्वया चिरं स्थितमिति केनचित् कश्चिद् उक्तः
सन्नाह। नाहं कलिंगान् जगामेति। न केवलमवस्थानमेव निषिध्यते किं तर्हि तद्धेतुभूतं गमनमपीति
भवत्यत्यंतापह्नवः। यदा तु कलिंगेष्वगम इत्युक्तः सन् गमनमेवापलपति न तदात्यंतापह्नव इति
लङेव भवति न कलिंगेष्वगच्छमिति। इति हेति। इति श्रूयते इत्यर्थः। प्रश्ने चासन्नप्रश्न इति। कर्मणि
नङ्। आसन्नेति। पंचवर्षाभ्यंतरं आसन्नकालं पंचवर्षातीतं तु विप्रकृष्टं कालमित्याहुः। प्रश्नमा
न इति। आसन्नकालिके भूतानद्यतनपरोक्षार्थवृत्तिधात्वर्थे पृच्छ्ये सतीत्यर्थः। पक्षे यथाप्राप्तमिति।
लुङ्लङोरभावपक्षे अपरोक्षे लङ्। परोक्षे लिडित्यर्थः। यावत्पुरा। लक्षणप्रतिपदोक्तपरिभाषा च
नित्येति निपातग्रहणेन ज्ञायते। यावद्भुंक्ते इति। निश्चितं भोक्ष्यते इत्यर्थः। यावद्दास्यते इति। अनद्यतन
भविष्यति तु यावद्दाता तावद्भोक्ते इति प्रत्युदाहर्त्तव्यम्। किंवृत्ते। किमाहर्त्तं किं हर्त्तम्। लिप्स्यमाने इति। लिप्सा ३४४
याः सत्त्वात् पूर्वेण सिद्धे पृथक् किंवृत्तार्थमिदमिति ध्वनयन्नुदाहरति। योऽन्नमिति। लोडर्थेति। कृष्णभोजनं
लोडर्थस्य गोचारणप्रैषस्य लक्षणम्। कृष्णभोजनकाले गोचारणं त्वया कर्त्तव्यमित्यर्थः। पक्षे इति॥
कृष्णश्चेद्भोक्ता कृष्णश्चेद्भोक्ष्यते त्वं गाश्चारयेति। लिङ्योर्धातं तद्धितार्थोत्तरपद इत्यत्र दिक्संख्ये कालाव ठन्नार
इत्यनुवर्त्तनाद् दिक्समासो दुर्लभ इत्याशंकायामाह। निपातनादिति। येनोपाधिनेति। धातुविशेष
४

णोपाधिना। तथाहि। पूङ्यजोः शानन् विहितः स ताभ्यामेव धातुभ्यां भवति न तु धात्वंतरात्। तच्छीलादि
विशिष्टकर्त्तरि अलंकृञ् इत्यारभ्य आ भ्राजभासेति यावदिष्णुजादय उक्तास्तेपि तच्छीलादिष्वेव
धातुभ्यस्तस्मिंस्तस्मिन्नुपाधौ सत्येव भवति। आशंसायां। आशंसनमाशंसा। आप्तुमिच्छा। पूर्व
विषये इति। आशंसायामित्यर्थः। तेन पूर्वलकारापवादोऽयम्। आशंसावचने। भूतवच्च वर्त्तमानवच्च
प्रत्यययोरपवादः। न भूतवदिति। न वर्त्तमानवदित्यपि बोध्यम्। आशंसे अधीयीयेति। एवं प्रार्थये
अधीयीय इच्छामो वयमधीमहीत्यादि ज्ञेयम्। क्षिप्रयोगेऽपि परत्वाल्लिङिति भावः। नानद्यतन। भूतानद्यतने
लङ्लिटौ भविष्यत्यनद्यतने लुट् तौ चानयोरर्थयोर्निषिध्येते तदाह। लङ्लुटौ नेति। एवं च भूते लुङ्
भविष्यति तु लृडित्याशयेनोदाहरति। अदाद्दास्यतीति। अग्नीनिति। आहवनीयादीन्। भविष्यति
मर्यादा। अक्रियाप्रबंधार्थं सामीप्यार्थं चेदं वचनं। [illegible] नानद्यतनवदित्यनुवर्त्तते तदाह। अनद्य
तनवन्नेति। लुडत्र नेत्यर्थः। तस्य यदवरमिति। पाटलिपुत्रावधिकमार्गस्य यदवरं कौशांब्याः सका
शादित्यर्थः। कौशांब्याः पूर्वमिति यावत्। भविष्यति किं। योऽध्वा अतिक्रांत आपाटलिपुत्रात्तस्य
यदवरं कौशांब्यास्तत्र सक्तून् अपिबाम। मर्यादावचने किं। योऽध्वा गंतव्यो निरवधिकस्तस्य य

दवरं कौशांब्यास्तत्र सक्तून् पातास्मः। कालविभागेच। कालविभागः कालविशेषः। अनहोरात्राणा
मिति संबंधे षष्ठी। पूर्वसूत्रमनुवर्त्तते। तदयमर्थः। मर्यादोक्तौ कालविभागे कालविशेषे यदवरं त
स्मिन् प्रविभागे भविष्यत्यनद्यतनवन्नासकालविभाग अहोरात्रसंबंधी न चेदित्यर्थः। उत्तरार्थमिति।
परस्मिन् विभाषेति सूत्रे कालमर्यादाया एवानुवृत्तिर्यथा स्यात्। भविष्यतीति किं। यः संवत्सरोऽतीत
स्तस्य यदवरं मासात् तत्र पयोऽपिबाम। मर्यादावचने किम्। यो निरवधिः समयस्तस्य यदवरं मासात्
तत्र पयः पातास्मः। पंचदशरात्र इति। नन्वत्र संख्यापूर्वं रात्रं क्लीबमिति क्लीबत्वेन भाव्यमिति चेत्।
सत्यम्। अत एव हि भाष्यप्रयोगात् क्लीबत्वं नेत्याहुः। परस्मिन्। भविष्यत्यनद्यतने विकल्पेन
निषिध्यते। वर्ज्यमिति। णिजंतादचो यदिति कर्मणि यत्। वर्जमिति पाठे तु द्वितीयायां चेति णमुल्।
अनहोरात्राणामित्येव। यो वत्सर आगामी तस्य यत्परं पंचदशरात्रात्तत्र पयः पातास्मः इत्यादि।
लिङ्निमित्ते। अतिपत्तिरनिष्पत्तिः। भूतेच। लिङ्निमित्ते लृङ् स्याद्भूते क्रियातिपत्तौ। अद्यतनानद्यतन उ॰१
साधारणभूतग्रहणमिह ज्ञेयम्। अस्योदाहरणानि उताप्योः समर्थयोर्लिङ् इत्यारभ्य समान
कर्तृकेषु तुमुन्निति सूत्रं विहाय सप्तसूत्राणि बोध्यानि। ततः प्राचीने पूर्वोताप्योरित्यनेन विकल्पोक्तेः।

भविष्यतिपरे

लृङ् वेति। लिङ्निमित्ते भूत एवायं विकल्पो भविष्यति तु नित्यमेव लृङ्। गर्हायां लडपिजात्वोः।
अत्र वोताप्योरिति न संबध्यते। वर्त्तमाने लडुक्तः कालत्रये तु न प्राप्नोतीति विधिरयम्। कालत्रय इति। काल
विशेषानुपादानादिति भावः। परत्वादिति। निरवकाशत्वादिति बोध्यम्। अपिजायामिति। त्यक्ष्यसि। अत्या
क्षीरित्यादि विषयेऽपि त्यजसीत्यादि लडेव प्रयुज्यत इति भावः। एवं जात्वां त्याज। अत्यजत्। अत्याक्षीत्।
त्यक्ष्यतीत्यादि विषयेऽपि जायामपि त्यजति जातु गणिकामादत्ते इति लडेव कालत्रये लकारापवादतया
प्रयोक्तव्यः। लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति। कालत्रये लकारा इति। परोक्षानद्यतन
भूते लिट्। कथं धर्मं त्यक्ष्यथ। भूतानद्यतने लङ्। कथं धर्ममत्यजः। भूतसामान्ये लुङ्। अत्याक्षीः।
भविष्यत्यनद्यतने लुट्। त्यक्तासि। भविष्यसामान्ये लृट्। त्यक्ष्यसीत्यादि। अत्रेति। क्रियातिपत्ताविति
ज्ञेयम्। किंवृत्ते। लिङ्लृटौ कालत्रयेऽस्तः। नानुवर्त्तत इति। एवं यस्मिन् विषये कालत्रये लकाराः
पक्षे न भवंतीति भावः। प्राग्वदिति। क्रियातिपत्तौ भविष्यति नित्यं लृङ्। भूते वेत्यर्थः। अनवक्लृ
प्त्यमर्षयोः। लिङ्लृटौ यानुवर्त्तेते तौ च कालत्रये भवतस्तेन सर्वलकाराणामपवादौ। लृङ् प्राग्वदिति।
भूते वा। भविष्यति नित्यमित्यर्थः। न संभावयामि नैवेद्धमर्षयामि च इमं निंदिष्यादित्याद्युदाहर्त्तव्यम्। किंकिला
स्त्यर्थेषु। लिङ्लृटोः प्राप्तयोः इह लृट्ग्रहणात् लिङ् नेत्याशयेनाह। लिङोऽपवाद इति। अस्ति भवतीति। त्वत्कर्त्रिकं

अङ्गीगमनमस्तीत्यादिरर्थः। अवक्लृप्ताविति। सिङोनिरस्तत्वेनतन्निमित्तत्वाभावात्। जातुयदोर्लिङ्। अनवक्लृप्त्य
मर्षयोरितिवर्त्तते। तथा च अनवक्लृप्त्यमर्षयोरितिलिङ्लृटोःप्राप्तयोर्वचनमिदंलृटोबाधनार्थमित्याह। लृटोऽप
वादइति। अयंकालत्रये। लृङ्प्राग्वदिति। क्रियातिपत्तौभूतेवा। नविष्यतिनित्यमित्यर्थः। जातुनवान्हरिमनिंदि
ष्यदित्याद्युदाहरणम्। अगर्हणीयमिदम्। गर्हायांतुजातुयोगेलड्कः। यच्चयत्रयोः। अयमपिलिङ्लृटोऽपवादः।
योगविभागस्तूत्तरसूत्रद्वयेयच्चयत्रयोरित्येतस्यैवानुवृत्तिर्यथास्यादित्येतदर्थः। क्रियातिपत्तौलृङ्प्राग्वत्।
यच्चयत्रवात्वमेवमकरिष्यं नश्रद्दधेनमर्षयामीत्यादि। गर्हायांच। कालत्रयेऽयंनवतीतिसर्वलकारापवादः।
गर्हायांविनापाकथमितिलट्प्राप्तस्तत्रैवकिंवृत्तेइतिलट्प्राप्तस्तयोरपवादो। यच्चयत्रयोर्योगे
लिङ्वस्यादिति। चित्रीकरणे च।
विहितोऽयंलिङितिभावः। लृङ्प्राग्वत्। यच्चयत्रवात्वंशूद्रमयाजयिष्यः। आश्चर्यंतत्। शेषेलृडयदौ। सर्वलकारापवादः। लिङ्निमि
अयमपिकालत्रये। लृङ्प्राग्वत्। यच्चयत्रवात्वंशूद्रमयाजयिष्यस्तदन्याय्यमित्यादि। आश्चर्यनिमित्तेलृटिप्रतिषिद्धे यदायद्योरुपसंख्या
रिहइवङ्न सोऽधीयीतेति। अत्रानवक्लृप्तिराश्चर्यंचद्वयंगम्यतेनत्राश्चर्यनिमित्तेलृटिप्रतिषिद्धेयदायद्योरुपसंख्या ... कामप्रवेदने। लिङ्
नाजातुयदोरितिलिङ्। उताप्योः। समः समानोऽर्थयोयोस्तौसमर्थौशकंधादित्वात्पररूपं। कामप्रवेदने। ३९
स्यादिति। कालत्रयेसर्वलकारापवादः। कच्चिज्जीवतीति। कामोमेइत्यनुषंजनीयम्। वर्त्तमानसामी
प्येइतिसद्। संभावनेऽलमितियेत्। प्रौढिरिति। पर्याप्तिरित्यर्थः। नञ्पणादिः। धातोश्चप्रत्ययविधानात्

तदर्थगोचरमेवसामर्थ्यंगृह्यते। इदंधात्वर्थमनुष्ठातुंसमर्थमित्येवंरूपत्वेनसंभावनमित्यर्थः। प्रथमया
सहसम्यायेति। संभावनेइतिसहसम्यंतंप्रथमयाविपरिणम्यते। अलमितिप्रथमांतंसहसम्येति
संबंधः। सिद्धः अप्रयोगोयस्यतस्मिन्नलमिसति। यत्रालम्शब्दोनप्रयुज्यतेतदर्थस्तुगम्यते
तत्रेतिफलितोऽर्थः। ~~संभावनत्वेन~~ अपिगिरिमिति। संभावनद्योतकोऽपिशब्दः। गिरिविदारणो
पर्यातइतिसंभावनाऽवगम्यते। कालसामान्येयंलिङ्। कालसामान्येइत्युपलक्षणम्। संभा
वनस्यनविष्यद्विषयत्वात्। अतएवलृटप्रत्युदाहरिष्यति। एवंनामायंबलवानित्यर्थः। गिरिं
तुभिन्द्यान्नुमावाभिदत्। लृङ्प्राग्वत्। अपिगिरिंशिरसाऽभेत्स्यत। अलमितियेत्किम्। प्रायेण
गमिष्यति। अनद्यतनेलुडपीत्यदाऽर्थः। विभाषाधातौ। संभावनमुच्यतेयेनतत्संभावनवचनंतस्मिन्
धातौसंभावनार्थकधातावित्यर्थः। भुंजीयास्त्वमिति। अत्रपूर्वेणनित्योलिङ्। हेतुहेतुमतोः
नमेद्वेदिति। लक्ष्यस्यनतिःसुखप्राप्तौहेतुः। नविष्यत्येवेति। लिङित्यनुवर्त्तमानेपुनर्लिङ्ग्रहणं
कालविशेषप्रतिपत्त्यर्थमितिभावः। ~~अनसिङ्निमित्त्वाभविष्यतिक्रियातिपत्तौलृङ्भ~~
हंतीत्यादि। नवुलक्षणहेत्वोःक्रियायाइतिहंतेःशतृप्रत्ययःस्यात्। हननस्यपलायनहेतु
त्वात्। मैवम्। लक्षणहेत्वोःक्रियायाइतिसूत्रेनन्वोर्विभाषेत्यतोविभाषेत्यनुवर्त्यव्यवस्थित

ऽसंभावनेऽलमिति। नञ्प्रश्लेषमयविपरिणामितत्वोक्तव्यमत्रत्रस्यद्य
लमप्रतिसंबंधः। अलमिति संभावने। लक्षि स्याय स्याहि लीयस्त्रैव
विपरिणामसर्वत्रैवेति। हः। क्रियाप्रयोजेस्त्वालं। ३

गिरि विदा सा

भावः। क्रियातिपत्तौ तु भूते न विध्यतिपत्ति नित्यं लृङ्। यद्यवर्षिष्यत् अस्यमुदपत्स्यत॥१

विभाषाग्रहणान्नुवृत्तौ। इच्छार्थेषु लिङ्लोटौ। एतदुपपदे धातोरेतौ स्तः। सर्वलकारापवादः। लिङ् चेत्य
नेन समानकर्तृकेषु लिङो विधानादिह लिङ्लोटौ असमानकर्तृकेषु भवत इति बोध्यम्। इच्छन्करोती
ति। अत्र अनभिधाना समानकर्तृकेष्विति तुमुन्। लिङ्घ्या। समानकर्तृकेषु तुमुन्नित्यनेन इच्छार्थे
लिङ्लिटौ विहितौ तयोर्लिङ्लोटौ बाधे प्राप्ते लिङः प्रतिप्रसवार्थं सूत्रम्। नन्वत्र वासरूपविधि
ना लिङ्लोटोर्नित्यं बाधो नेति शंक्यम्। क्तस्तुद्वुत्तुन्नवलर्थेषु तदभावात्। यद्यपि वासरूपविधिः
स्यादेवमपि लिङे वस्यात् लोट् मा भूदित्येवमर्थं। क्रियातिपत्तौ लृङ् प्राग्वत्। विधिनिमंत्रणेति लिङ्
ति। न विध्यति लिङ्यतो विध्यादयश्चत्वारः प्रवर्तना विशेषाः। प्रवर्तनायाः प्रवृत्तविषया। संप्रश्नप्रार्थ
नेऽपि तथेति। नैषां भूतविद्यमानयोः संभवोऽस्ति। विधाविति। गुर्वादिना शिष्यादेः प्रेरणं विधिरत्नेति
यावत्। निमंत्रण इति। निमंत्रणं नियोगकरणं। नियोजनावश्यंभावेन करणं। यदकरणे प्रत्यवा
य इति यावत्। श्राद्धे इह निमंत्रितो दौहित्रादिरवश्यं भुंजानः प्रत्यवैति। अनिच्छेनामंत्रितो नापक्रमेदिति ३७
स्मृतेः। आमंत्रण इति। आमंत्रणं कामचाराणुज्ञा। यदकरणेऽपि न प्रत्यवाय इत्यर्थः। अधीष्ट इति। अधीष्टः
सत्कारपूर्वको व्यापारः। गुर्वादेराराध्यस्य व्यापार इत्यर्थः। संप्रधारण इति। संप्रश्नः संप्रधारणम्।
इदं कर्तव्यमिदं वेत्येवं रूपा विचारणा। प्रार्थन इति। प्रार्थनं याञ्चा प्रसिद्धा। एवं लोडिति। विध्यादिष्वेव लोडपि
विधानात्। १

प्रैषातिसर्गेति लोटोऽनुकर्षणमिति। लोड्चेति योगविभागस्येदमेव प्रयोजनमेकयोगत्वे तु लिङोऽप्यनुक
र्षणं स्यात्। प्राप्तकालार्थमिति। प्रैषातिसर्गयोः पूर्वेणैव सिद्धत्वादिति भावः। लिङ् चोर्ध्वमौहूर्तिके। मौर
प्राप्तकालविशेषे प्राप्तस्य लिङो विधानार्थमिदं सूत्रम्। प्रैषातिसर्गयोस्तु पूर्वेण प्राप्त एव लिङ्।
लोट् कृत्यानां कालविशेषेऽस्मिन् लिङा बाधा मा भूदिति चकारः। एतत्सूत्रविषय इति। प्रैषादे
य ऊर्ध्वमौहूर्तिक इति चानुवर्तते इति भावः। अधीष्टे च। लिङोऽपवादः। योगविभागस्तु ऊर्ध्वमौहू
र्तिकाननुवृत्त्यर्थः। लिङ्यदि। तुमुनोऽपवादः। यत्कालः प्यतीत्यत्र तु न। प्रैषादीनामनुवृत्तेः। अर्हे।
योग्यकर्तरि गम्यमाने कृत्यतृचो भवंति। चाल्लिङ्। त्वया कन्या वोढव्या। त्वं कन्यां वोढा। कन्यां वहेः
इति। कन्योद्वाहे योग्यस्त्वमित्यर्थः। नन्वर्हे किमर्थं कृत्यतृचो विधीयंते सामान्येन विहितत्वा
दर्हेऽपि न विशंतीति चेत्। अत्राहुः। अर्हतायां द्योत्यायामप्राप्तो लिङ् विधीयते तेन न लिङा बाधा
मा भूदिति कृत्यतृचो विधानम्। न च वासरूपविधिना समीहितसिद्धिः। स्त्र्यधिकारादूर्ध्वं
तदप्रवृत्तेरिति। धातुसंबंधे। वनानि पश्यन् ययावित्यादौ वर्तमान भूतकालादि प्रत्ययेषु को वा
स्यकालस्यापि भवतीत्याकांक्षायामाह। तिङंतवाच्येति। प्रधानानुरोधेन गुणस्य नयनं उचितम्।
न तु गुणानुरोधेन प्रधानस्येति भावः। गुणभूतक्रियावाचिभ्यः प्रत्यया इति। कालांतरभाजो भवंतीत्यर्थः।

न्तेऽलङिति। एवं चनुपश्चित्वाददर्शेत्यर्थः। अतीनेति। अतीतवासकर्तृकसीयस्य दर्शनस्येति बहुव्रीहिः।
सोमयाजीति। सोमेन करणे यज इति। न विष्ठ निणिनिः। अत एवाह। सोमेन यक्ष्यमाण इति। एवं
च पश्यन्नययावित्यत्र ददर्श न्नेते लट्। ददृशे ययावित्यर्थः। निवेदयिष्ठतो मनो न विद्यथे इत्यत्र तु
वेदयते न्नेते लट्। तस्य लटः सदिति शतृप्रत्ययः। निवेदनं क्तवत इत्याद्युह्यम्। वसन्ददर्शेत्यादौ
न्नेते लक्षणया यथायथं लङादिः स्वीकर्तव्यः। क्रियासमभिहारे। द्योत्य इति। क्रियासमभिहारो धातोरे
वार्थः। लोट् तु द्योतक इति भावः। नस्य च हिस्वौ स्त इति। ननु लोट इत्यनेन तिङो लक्षयित्वा तिङामेव हिस्वौ
विधीयेताम्। तथा सति तिङंतत्वात्पदत्वं लभ्यत इति गुणेष्यस्ति वा यतध्वमोरिति वाक्यशेषोऽपि स्वरसतः
संगच्छते। अन्यथा येन नाप्राप्तिन्यायेन हिस्वयोस्तिङपवादत्वे सति तध्वमोः स्थाने तयोर्विकल्पेन विधानासंभ
वादुक्तवाक्यशेषो दुरुपपाद इति चेत्। अत्राहुः। लोडादेशस्य तिङ्लक्षणेन न्यायात्। असंजातविरोधित्वेनोप
क्रमस्य प्राबल्यात् विषयसप्तम्या आश्रयणेन वाक्यशेषस्योपपन्नत्वात्। किंच। तिङामादेशत्वे तिप्सिप्मिपां ३४
स्थाने विहितस्य स्थानिवद्भावेन पित्वात् ङित्वाभावेन लुनीहीत्यत्र ईहल्यघोरितीत्वं न स्यात्। ब्रूहीत्यत्र ब्रुव
ईडितीडागमे ब्रवीहि इति स्यात्। किंच। लादेशानामेव परस्मैपदात्मनेपदसंज्ञे न तु लादेशादेशानामिति सर्वेषां
तिङां द्वावपि हिस्वौ पर्यायेण स्याताम्। ततश्च लकारस्यैवादेशौ हिस्वौ न तु तिङामित्यवश्यं स्वीकर्तव्यमिति।

ननु चैवं द्वयोरपि लः परस्मैपदमिति परस्मैपदसंज्ञा स्यात्ततश्च परस्मैपदिभ्य एव हिस्वौ स्यातामत आह।
तौ चेति। अयं भावः। लोटो हिस्वौ इति वाक्ये क्रियासमभिहारे लोडिति वाक्याल्लोडित्यनुवर्तते। तच्च हिस्वा
वित्यस्य विशेषणम्। तत्र हिस्वौ लोट् भवत इति सामर्थ्याल्लोट्धर्मकावित्यर्थः संपद्यते। तत्रापि मुख्यलोट्
संबंधिनो धर्मस्यातिदेशो व्यर्थः। स्थानिवत्त्वेनैव तत्सिद्धेः। किंतु। स्थानिवद्भावलब्धलोट्व्यपदेशकौ तिङ्
न्तौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यते। केचित्तु। क्रियासमभिहारे लोडित्यस्यानंतरं साध्यवाक्यस्य
हिस्वावितिवक्तव्ये लोड्ग्रहणसामर्थ्याल्लोट्धर्मकावेव हिस्वौ लोटः स्थाने भवत इत्यर्थः संपद्यते तथा
च पूर्वोक्तरीत्या तिङन्तौ यौ हिस्वौ तयोरेव धर्म इहातिदिश्यते इति सिद्धमिष्टम्। एवं च लोटो हिस्वाविति
वाक्ये क्रियासमभिहारे लोडिति वाक्याल्लोड्ग्रहणं नानुवर्तनीयमित्याहुः। तिङ्संज्ञौ चेति। तेन पदत्वं
तिङ्तु। तिङ् इति च भवति। हिस्वविधानेति। यदि हि पुरुषवचनसंज्ञे अपि स्यातां तर्हि पुरुषसामाना
धिकरण्ये एकत्वे च सत्येव हिस्वाभ्यां भाव्यम्। तत्र यथो हिस्वविधिरिति भावः। समुच्चय इति।
प्रागुक्तमिति। धातोर्लोट् लोटो हिस्वौ तध्वमो विषये वेत्यर्थः। यथाविध्यनुप्रयोगः। आद्य इति। क्रिया
समभिहारविषये। अत्र संख्याकारकपुरुषकालविशेषाणां हिस्वांतादप्रतीतेस्तद्बोधनायानुप्रयोगो
न्यायतः प्राप्त एवं च तदनुवादेन यथाविधीति नियम्यते तथा च नियमनाद्याहि याहीति गच्छतीत्यादि

नमवति। इतिशब्दस्थितिं ननु इतिशब्देन व्यवधानाद्धातीत्यस्यानुप्रयोगत्वं कथमिति चेत्। अत्राहुः।
अनुप्रयोगस्येहानुवादिमात्रपरत्वाद्व्यवहितविपरीतप्रयोगयोरिष्टापत्तिः। एवमितियाहियाहीति
यातः एवमत्र्युमित्यर्थः। यानयानेति दृश्यं याथेति। विध्यादिलोड्विषयेतु अनुप्रयोगे यानयानेति
दृश्यंयानेत्यनुप्रयोक्तव्यम्। पक्षे इति। वा च तध्वमोरित्युक्तत्वात्तस्याभावपक्षे इत्यर्थः। अधीध्व
मधीध्वमिति दृश्यमधीध्वे इति। विध्यादिलोड्विषयेतु अधीध्वमधीध्वमिति दृश्यमधीध्वमित्यनु
प्रयोक्तव्यम्। भावकर्मणोरुक्ता। भूयस्व भूयस्वेति भूयते पच्यस्व पच्यस्वेति पच्यत इत्यादुक्तेयम्।
समुच्चये ऽन्यतरस्यामिति सूत्रे क्रियासमभिहारे इत्यस्याननुवर्त्तनात् द्वित्वमत्र त्वेवोदाहरति।
सक्तून् पिबधानाः खादेति। अभ्यवहरथेति। विध्यादिलोड्विषयेतु अभ्यवहरतेत्यनुप्रयो
क्तव्यम्। एवमभ्यवहरध्वे इत्यत्राप्युक्तविषये अभ्यवहरध्वमित्यनुप्रयोक्तव्यम्। पक्षे हित्वा विति।
पिबखादेत्यभ्यवहरथ। त्वं च आस्वादस्वेत्यभ्यवहरध्वे इत्युदाहार्यं। लवनादिकमेति। आदिशब्देन मोषण
हरणे ग्राह्ये। अनुहत्यस्तु पगमे बाधकमाह। लोडंनेति। त्वमएवेति। पुरुषांशे वचनांशे चेति भावः।
एवमुक्तोदाहरणेषु हिस्वान्तेषु तिङंतत्वं यथायथं परस्मैपदात्मनेपदांतत्वं च सिद्धम्। पुरुषवचनसंतें
तु विधानसामर्थ्यात् हिस्वयोर्नस्तः इत्युक्तमिति सर्वेष्टसिद्धिः। इतिलकारार्थप्रक्रिया। इतिश्रीकौमुद्यां तिङंतं
संपूर्णं। शुभं भवतु। श्रीरस्तु।

३५८

॥ कौमुद्यां तत्त्वीयतन्त्रे एकशतोत्तरषड्विंशतिपत्रात्मिका १२६

श्रीगणेशाय नमः।
श्याद्यधेति। उपसर्गं किं वाधितुं। आतश्चोपसर्गे कः। इति कं वाधितुं। श्यै ङ् गतौ। नौ० आत् इत्याकारांतात्
व्यध ताडने। दि० स्नु गतौ। इण् गतौ। अवपूर्वः षोन्तकर्मणीति धातुः। हृञ् हरणे। अवपूर्वः। लिह आ
स्वादने। श्लिष आलिंगने। श्वस प्राणने। दुन्योः। टुदु उपतापे। नाथमते। भू प्राप्तौ। चु० आत्मनेपदी।
रतिखनि रंजरागे। नौ०। ह्वया। ओहाक् त्यागे। ओहाङ् गतौ। फक्कस्व। फक्क ङ् गतौ। स्रु गतौ। भ्वादी। लूञ्
छेदने। क्र्यादिः। आशिषिच। जीवतात् जीवकः। जीवनं तव भूयात् इत्यर्थः। शासिकामि। शीसमाथौ।
नौ० कमु कांतौ। कांति रिच्छा। नौ० स्वार्थे णिङ्। नन्द अदने। चुर० पर गति भक्षणयोः। ईहि दमिभ्यां।
दमु उपशमे। नौ० कावामस्य। ष्ठिवु सर्वदीयांशब्देवा। वेञ् तंतुसंताने। भ्वादी। माङ् माने। मेङ् प्रतिदाने।
नौ० तस्य आतो। त्रैङ् पालने। पाठित्रे। कविधौ। न्यावयोग्राहनो। अनृतपः तत्र जिनाति। हीणं करोति।
अनृच्यग। आखूनामुत्थानं। आस्यत्थः। कर्तृकर्मणोः कृति। उभयप्राप्तौ कर्मणि इति योगे कर्त्तरि कर्मणि च षष्ठी स्यात्।
कप्रकरणे। मूलविभुजादिभ्य इति। धृञ् धारणे। गॄ निगरणे। तु० अचि विभाषा। गिरतेरेफस्य लत्वं
वास्यादजादौ। सर्मिथ्य। समिधं पपरेख्यातेः कः। गापोष्टक्। शब्दे। नौ० पा पाने। हरतेः। उद्यमनं भारादे
वहनं। सूत्रेयाम्। सूत्रं कार्पासजं प्रायः। वयसि च। उद्यमानार्थे वहनार्थे। कवचहरः। कवचधारणसमर्थो वा
वयोवानित्यर्थः। स्तंबकर्णयोः। जपजस्य च। तौ। चि० नौ०। चिरासेना। सेनां चरति प्रविशति। सेनाचरः।
दिवाविभेति सूत्रे हेत्वाद्यर्थाभावे पिट विधानार्थं। किं यदादिभ्यो ऽन् विधानं सामान्ये। इत्याद्यर्थेषु तदभावे पिच

पुस्त०१

किंयत्तदादिषु ञ्मो ञ् भवति। कर्मणि हन्तो। कर्मण्युपपदे न कर्मग्रहणं स्वरूपपरता। अकर्तरि च
उत्तरपदं समासस्य रमाप्य यत्रेरूढं। गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। वाम
उनी। अगमत्तोऽप्रयोग्यतो॰ वहाभ्रे। सार्वधातुकमपित्। इति ङित्त्वं। असूर्य। अपरिहार्यदर्शनं
सूर्यमपि न पश्यन्ति। सत्यपि सूर्यदर्शने प्रयोगो भवत्येव। गमेः सुपि वाच्यः। गमश्चेति सूत्रेण संज्ञायां
खचि प्राप्ते असंज्ञायां विधानार्थं गमेः सुपीति सूत्रं। खच्च डिद्वा वाच्यः। व्यवस्थितविभाषया वाच्य
इत्यर्थः। तेन कच्चिद्वा। क्वचिद्विभाषा यथाप्रयोगं ज्ञेयः। द्विषत्परयोः। शत्रिंतपः तांकुशेतिवान्नि
केघटघटीग्रहणादित्यर्थः। ह्रस्वर्योः। ह्रविदारणे। खित्यादिः। खचि ह्रस्वः। इति उपधाया ह्रस्वत्वं। सहि
ग्रहणं। संज्ञायामिति सूत्रे सहेर्ग्रहणात्। ह्रः सर्वयोरित्यत्र सहिग्रहणमसंज्ञार्थं। सर्वंकषः। कषहिंसायां।
नौ॰ आशिषि किं। शत्रुघातः। हनस्तोऽचिण्णलोः। अनगपधायाः ... होहन्तेरिति कुत्वं। लक्षणे जाया। जमहनेति
उपधालोपः। होहन्तेरिति कुत्वं। जायाघ्नः। जायाघातकलक्षणवान्। अमनुष्यकर्तृके च। अमनुष्यकर्तृके
हन्तेष्टक् स्यात्। चोरघातो नगरघातो हस्ती। अमनुष्यकर्तृकत्वात् टकि प्राप्ते बाहुलकादण्। शक्तौ॥
कंशिरः पाटयति प्रविशतः कपाटं। कवाटं। अरुतेः पश्चाद्यत्। कवं चोष्णे इत्यत्र योगविभागात्कोः
कवादेश इति हरदत्तः। पाणिघ। शिल्पं क्रियाकौशल्यं तदस्यास्तीति शिल्पी। आढ्यसुभग इत्यत्र प्रतिषेध
३५०

समान इव दृश्यते। सदृक्। कर्मकर्तरि प्रत्ययः। रूढ्यर्थानुसारत्वात्

सामर्थ्यात्। करणाधिकरणयोश्च। ल्युट् स्यात्। इति सूत्रेण ल्युडन्ते ति काशिका। माधमतेन आढ्यी
करणं इति प्रयोगे सिद्धे। आढ्यसुभगेति सूत्रे अच्वावित्यस्य ग्रहणं अग्रे अनुरत्यर्थं। अच्वौ इ
त्यस्य केतु। ... ध्यंतेषु आढ्यादिषु नुवः। खिष्णुच् खुकञौ स्तः। त्यदादिषु। दृशदृशवतुषु।
समानस्य सः स्यात्। इवकुइत्यर्थः। दृक्त्वेत्येति वक्तव्यं। आसर्वनाम्नः। सर्वनाम्न आकारोऽन्तादेशः स्यात्
दृग्दृशवतुषु। सत्सूद्विषेति। उपसर्गे सतीति एभ्यः क्विप् स्यात्। असत्युपसर्गे सुयुषपरे क्विप् स्यात्। द्युसत् सत्य सति ५
विद्रुपे छंदसि। आनोमनिन्वनिपश्चेति। अधिकत्याह। अन्येभ्योऽपीति। शृहिंसायां। क्यादिः।
शणगतौ। अंतः। अन प्राणने। अदादिः। गमादीनामिति। ननु विस्तारे। नहिरतिवृषिव्यधिरुचिसहि
तनिषु क्वौ। क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः। परीतत्। ऊङ् च गमादीनामिति वक्तव्यं। लोपश्च। गमे
र्मकारस्यानुनासिकलोपे कृते अकारस्य ऊङ् आदेशः। इति प्रासादग्रंथः। ऊङ् चेत्यादिवार्त्तिकस्य
गमः क्वावित्यस्य सूत्रस्य च आरंभसामर्थ्यात् क्वौ परे पक्षे लुक्। पक्षे ऊङादेशश्चेति अनुमीयते।
प्रायेण गमादयो द्विविधाः। जगमितन्यादयः। गमिन्नम्यादयश्च। अग्रेगूरित्यादिप्रयोगादर्शनात्
इत्यनुमितिः। कर्तर्युपमाने। ध्वांक्षः काकः। नद अदनो॰ बहुलमाभीक्ष्ण्ये। पुनःपुनः पिबतीति सामर्थ्य

दान्तिर

स्यादित्ते पयः पिबंति। ननाछी स्यात्। प्रातिपदिकांतनुम्विभक्तिषु चेति णत्वं। क्षीरपायिणः। उशी
नराः उशीनरदेशस्थाः। आत्ममाने। कालिंमन्येत्यत्र क्यङ्मानिनोश्चेति प्राप्तात् सुवद्भावाद्विप्रति
षेधेन खित्यनव्ययस्येति ह्रस्वः। दृशेः क्वनिप्। अन्येभ्योऽपि दृश्यंते इति सिद्धे नियमार्थमिदं। क्वनि
बेव यथा स्यात् न तु सह निर्दिष्टं मनिनादि दिसोपपदं स्यात् इमा भूदिति। निष्ठा तु भवत्येव। सप्त
म्यां जनेर्डः। ङ्यापोः संज्ञाछंदसोर्बहुलं। इति ह्रस्वः। मंदुरा वाजिशाला। अनो कर्मणि। पुमनुजा पु
रुषोऽस्त्यनंतरं जातेत्यर्थः। अपि शब्दः। कारकांतरेषु। कर्तृकर्मादिषु इत्यर्थः। क्तिनः कामामयोऽर्थत
...वितन्येत्यर्थः क्वकर्मणि... दाभ्यां श्रीणः। सुकः कितीति नेट्। एकविंशतेः। अयादिषु घादयो द्वा
विंशतिः। तन्मध्ये पूज्यं विहाय यस्त्वादयः ज्ञेयाः। डुग्वोः। गूनः। गुपुरीषोत्सर्गे। तुदादिः। पूओ विनाशे। पूनाः।
दितात्स सुकः किति इति नेट्। ओदितश्च। नुजोकौटिल्ये। तुदादिः। उच्छूनः। शोफवान्जातः। संप्रसारणे कृते हल
रनिष्ठान इति दीर्घः। घुमास्थेति ईत्वं आकारस्य। प्रहीणः। ... संस्त्यानोऽर ...
संस्यात्।५ संयोगादेरातो धातोर्यण्वतः। इति नत्वं। अंचोऽनपादाने। अंचु गति पूजनयोः। उदक्तं उत्थितमित्यर्थः।
त्यः प्रसृतस्य प्राक्रितं संयोगादेरातो धातोर्यण्वतः इति नत्वं। स्त्यानः। आदेच उपदेशे शिति। २
उपदेशे एजंतस्य धातोरात्वं स्यात् न तु शिति। इति सूत्रे णा...कारस्यात्वं॥ ३५९

करणे यजः। | ॰ह्रियो दीर्घ

उं अथ सामान्यात् भूतार्थवाचिनां णिन्यादिप्रत्ययांतानां निष्ठांतानां विग्रहाः लिख्यंते। तत्त्य
र्थावबोधकं वाक्यं विग्रहः। आत्मानं लिखितो... अतो विग्रहः सुधिया शोधनीयः। सोमेनेष्टवान्।
सोमयाजी। अयाक्षीत्। इष्टवान्। पितृव्यं हतवान्। पितृव्यघाती। अवधीत्। हतवान्। सुषुतवान्।
सुत्वा। अकार्षीत्। कृतवान्। सोमं सुतवान्। सोमसुत्। असावीत्। सुतवान्। अग्निं चितवान्। अग्नि
चित्। अचैषीत्। चितवान्। श्येन इव चिनः। श्येनचित्। कर्मणि प्रत्ययः। अयायि चितः। सोमवि
क्रीतवान्। सोमविक्रयी। व्यक्रैषीत्। विक्रीतवान्। पारं दृष्टवान्। पारदृश्वा। अदर्शत्। अद्राक्षीत्। दृष्ट
वान्। राजानं योधितवान्। राजयुध्वा। अयोधीत्। योधितवान्। राजानं कृतवान्। राजकृत्वा। अका
र्षीत्। कृतवान्। सरसि जातं। सरसिजं। अजनिष्ट। जातं। ... प्राजनिष्ट। प्रजा। पुमांसमनुरुध्य
जाता। पुमनुजा। अजनिष्ट। जाता। न जातः। अजः। अजनिष्ट। जातः। द्वाभ्यां संस्काराभ्यां जातः। द्विजः।
ब्राह्मणो जातः। ब्राह्मणजः। परितः खाता। परिखा। कर्मणि प्रत्ययः। अखानि। खाता। अस्नायि
स्नातं मया। भावे प्रत्ययः। अस्तावि। स्तुतः। त्वया विष्णुः। कर्मणि प्रत्ययः। अकार्षीत्। कृतवान्।
विष्णुर्विश्वं। कर्तरि प्रत्ययः। केचित्। स्नायते स्म। स्नातं। स्तूयते स्म। स्तुतः। करोति स्म। कृतवान्।

र्तरि इत्यादि विग्रहान्निष्ठांतानां कुर्वंति। तत्रामादिकं लट् स्मे। स्मे लट् स्यात्। लिटोऽपवादः। इत्यु

क्तेः। स्मयोगिनो लटः लिट्स्थ। समानार्थत्वात्। लिट् उपरोक्तनद्यतन भूते भवति। निष्ठा उ[illegible]

लुङ्वत् सामान्यभूते। अतो निष्ठांतानां लुङंतो विग्रहः कार्यः। अक्षैषीत्। क्षीणवान्। अक्षायि।

क्षितः। कर्मणि। अशिश्रियत्। श्रितवान्। अश्रायि। श्रितः। कर्मणि। अभूत्। भूतः। भूतवान्। अस्तावीत्।

स्तुतः। अप्रोर्णावीत्। ऊर्णुतः। कर्मणि। अनावि। नुतः। कर्मणि। अवारि। वृतः। कर्मणि। अशारि। शीर्णः। अभेदि।

भिन्नः। अच्छेदि। छिन्नः। अलावि। लूनः। शीर्णदिस्त्रनांताः कर्मणि प्रत्ययांताः। अग्यासीत्। जीनः। अ

दैषीत्। दूनः। अगोषीत्। गूनः। अपावि। पुः। पूनाः। अपावि। पूतं कर्मणि। असायि। सिनः। सिता। कर्म २

कर्तरि। असायि। सितः। कर्मणि। लुजो कौटिल्ये। अलोचीत्। लुग्नः। उदश्वयीत्। उच्छूनः। प्राशयि। प्रशी

णः। कर्मणि। स्रुङ्। असावि। स्तनः। कर्मणि। असविष्ट। सूनवान्। डूङ्। उदडविष्ट। डूनः। उदडायिष्ट। उड्डीनः।

श्यैङ् गतौ। अश्यास्त। शीनं शीतं। समश्यास्त। संश्यानः। प्रत्यशास्त। प्रतिशीनः। अभ्यशास्त। अभिश्या ३५२

नं। अभिशीनं। अवाश्यास्त। अवश्यानः। अवशीनः। समवाश्यास्त। समवश्यानः। अंचु गतौ। समैंचीत्।

समक्तः। उदंचीत्। उदक्तं। अचितं उदकं। अव्रश्चि। वृक्णः। कर्मणि। अव्रश्चीत्। वृक्णवान्। प्रत्य[illegible]नीत्।

प्रतिस्तब्धः। न्यष्टंभीत्। निस्तब्धः। प्रत्यष्टंभि। प्रतिस्तब्धः। कर्मणि। न्यष्टंभि। निस्तब्धः। कर्मणि।

[illegible] सौत्रोयं धातुः। अदेवीत्। द्यूनः। अदेवि। द्यूतं भावे। निरवासीत्। निर्वाणः। निर्वातः। अ[illegible]

शुष्क। शुष्कः। अपाचि। पक्वः। ओदनः। कर्मणि। क्षै। अक्षासीत्। क्षामः। प्रास्त्यासीत्। प्रस्तीमः।

पूर्वे प्रफु न४ प्रस्तीतः। अस्त्यासीत्। स्त्यानः। अफालीत्। फुल्लः। अक्षीविष्ट। क्षीबः। प्रक्षीबे विग्रहे। प्रक्षीवितः।

अकृशत्। कृशः। प्रकृशितः। उदलाघिष्ट। उल्लाघः। प्रोदलाघिष्ट। प्रोल्लाघितः। उदफालीत्।

उत्फुल्लः। समफालीत्। संफुल्लः। अनोदि। नुन्नः। नुत्तः। कर्मणि। विद विचारणे। अवित्त। विन्नः।

वित्तः। विद ज्ञाने। अवेदि। विदितः। कर्मणि। विद सत्तायां। अविन्त। विन्नः। चौं दि उन्नः। उत्तः। कर्मणि।

अत्रायि। त्रातः। त्राणः। कर्मणि। अघ्रायि। घ्रातः। घ्राणः। कर्मणि। अह्रैषीत्। ह्रीणः। ह्रीतः।

